# Ganeshashtakam

# गणेशाष्टकम्

## Document Information

Text title : Ganesha Ashtaka 1

File name : gaNeshAShTakam.itx

Category : aShTaka, ganesha, gaNeshapurANa

Location : doc_ganesha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, Preeti Bhandare, Yash Khasbage

Description-comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 91 | 1.91 44-51|| phalashrutiH adhyAya 92 | 1.92 8-12||

Latest update : July 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# गणेशाष्टकम्

यतोऽनन्तशक्तेरनन्ताश्च जीवा
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ १॥

यतश्चाविरासीज्जगत्सर्वमेत-
त्तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसङ्घा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ २॥

यतो वह्निभानू भवो भूर्जलं च
यतः सागराश्चन्द्रमा व्योम वायुः ।
यतः स्थावरा जङ्गमा वृक्षसङ्घा-
स्तदा तं गणेशं नमामो भजामः ॥ ३॥

यतो दानवा किन्नरा यक्षसङ्घा
यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ ४॥

यतो बुद्धिरज्ञाननाशो मुमुक्षोः
यतः सम्पदो भक्तसन्तोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ ५॥

यतः पुत्रसम्पद्यतो वाञ्छितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतः शोकमोहौ यतः काम एव
सदा तं गणेशं नमामो भजामः ॥ ६॥

यतोऽनन्तशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना
सदा तं गणेशं नमामो भजामः ॥ ७॥

यतो वेदवाचोऽतिकुण्ठा मनोभिः
सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्दभूतं
सदा तं गणेशं नमामो भजामः ॥ ८॥

इति श्रीगणेशपुराणे उपासनाखण्डे एकनवतितमोऽध्याये
गणेशाष्टकं सम्पूर्णम् ॥

- ॥ श्रीगणेशपुराणं उपासना (पूर्व)खण्डः । अध्याय ९१ । १।९१ ४४-५१ ॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH . adhyAya 91 . 1.91 44-51..

(फलश्रुतिः ।
श्रीगणेश उवाच ।
पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसन्ध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ ९॥

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १०॥

यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बन्धगतं राजवध्यं न संशयः ॥ ११॥

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वाञ्छितान् लभते सर्वमेकविंशतिवारतः ॥ १२॥

यो जपेत्परया भक्त्या गजाननपरः नरः ।
एवमुक्त्वा ततो देवश्चान्तर्धानं गतः प्रभुः ॥ १३॥)

- ॥ श्रीगणेशपुराणं उपासना (पूर्व)खण्डः । अध्याय ९२ । १।९२ ८-१२॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH . adhyAya 92 . 1.92 8-12..

Proofread by PSA Easwaran, Preeti Bhandare, Yash Khasbage

*Ganeshashtakam*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*